जगर्त्तोकादित्रयं अकृतकं प्रतिकल्पमकार्य्यत्वात् ॥ महत्लोकस्य कृताकृतत्वे हेतुमाह शून्य इति” ॥)

कृतकः,त्रि,(कृन्तति स्वरूपम् । कृत् + क्वुन् । करणाव्यात इत्यर्थः । कृत्रिमस्य स्वरूपाच्छादकत्वात् तथात्वम् ।) कृत्रिमः । इत्युणादिकोषः ॥ (यथा, महाभारते। ४ । २ । २९ ।
“एतेन विधिना छन्नः कृतकेन यथानलः” ॥)

कृतकर्म्मा, [न्] त्रि, (कृतं कर्म्म येन सः ।) कार्य्यक्षमः । तत्पर्य्यायः । प्रवीणः २ शिक्षितः ३ निष्णातः ४ निपुणः ५ दक्षः ६ कृतहस्तः ७ कृतमुखः ८ कुशलः ९ चतुरः १० अभिज्ञः ११ विज्ञः १२ वैज्ञानिकः १३ पटुः १४ छेकः १५ विदग्धः १६ । इति हेमचन्द्रः ॥ (यथा, महाभारते १।१५५।२९।
“अथवाप्यहमेवैनं हनिष्यामि वृकोदर ! ।
कृतकर्म्मा परिश्रान्तः साधु तावदुपारम” ॥
पुं, विष्णुः । यथा, महाभारते १३ । १४९ । ९७ ।
“इन्द्रकर्म्मा महाकर्म्मा कृतकर्म्मा कृतागमः” ॥)

कृतकृत्यः, त्रि, (कृतं निष्पादितं कृत्यं कार्य्यं येन सः ।) निष्पन्नकर्म्मा । समाप्तकार्य्यः । यथा, माघे ।२।३२।
“कृतकृत्यो विधिर्मन्ये न वर्द्धयति तस्य ताम्” ॥

कृतकोटिः, पुं, (कृता विहिता कोटिः शास्त्राणां अन्तरर्थादिभेदने पूर्व्वपक्षविशेषो येन । यद्वा, कृता लब्धा कोटिः श्रेष्ठता येन । धातूनामनेकार्थत्वात् कृधातुरत्र प्राप्त्यर्थे युज्यते ।) काश्यपमुनिः । उपवर्षमुनिः । इति त्रिकाण्डशेषः ॥

कृतक्रियः, त्रि, (कृता क्रिया कार्य्यं येन सः ।) कृतकार्य्यः । यथा, मनुः । ५ । ९९ ।
“विप्रः शुध्यत्यपः स्पृष्ट्वा क्षत्रियो वाहनायुधम् ।
वैश्यः प्रतोदं रश्मीन् वा यष्टिं शूद्रः कृतक्रियः” ॥

कृतघ्नः, त्रि, (कृतं येन केनचिज्जनेन उपकृतं हन्ति नाशयति यः । अहङ्कारादिप्रयुक्तया दुष्टबुद्ध्या उपकृतस्यानङ्गीकारकत्वात् तथात्वम् ।) कृतहन्ता । अर्थात् येन केनचित्कृतस्य उपकारादेर्घातकः अस्वीकर्त्ता । नेमक्हाराम इति पारस्य भाषा ॥ (यथा, मनुः ४ । २१४ ।
“पिशुनानृतिनोश्चान्नं क्रतुविक्रयिणस्तथा ।
शैलूषतुन्नवायान्नं कृतघ्नस्यान्नमेव च” ॥)
तस्य प्रायश्चित्ताभावो यथा,—
“ब्रह्मघ्ने च सुरापे च चौरे च गुरुतल्पगे ।
निष्कृतिर्विहिता सद्भिः कृतघ्ने नास्ति निष्कृतिः” ॥
स तु बहुविधो यथा,—
“भर्त्तृपिण्डापहर्त्ता च पिष्टपिण्डापहारकः ।
यस्मादधीत्य विद्याश्च दक्षिणां न प्रयच्छति ॥
पुत्रान् स्त्रियश्च यो द्वेष्टि यश्च तान् घातयेन्नरः ।
कृतस्य दोषं वदति सकामान् न करोति यः ॥
न स्मरेच्च कृतं यस्तु पापमान् यस्तु दूषयेत् ।
सर्व्वांस्तानृषिभिः सार्द्धं कृतघ्नानब्रवीन्मनुः” ॥
इति प्रायश्चित्ततत्त्वे स्कन्दपुराणवचनम् ।

कृतच्छिद्रा, स्त्री, (कृतं छिद्रं यस्याम् ।) कोशातकी लता । इति राजनिर्घण्टः ॥

कृतज्ञः, त्रि, (कृतं उपकृतं जानाति स्वीकरोति यः । ज्ञा + कः ।) मर्य्यादी । (यथा, मनुः । ७।२०९–२१०
“धर्म्मज्ञञ्च कृतज्ञञ्च तुष्टप्रकृतिमेव च ।
अनुरक्तं स्थिरारम्भं लघुमित्रं प्रशस्यते ॥
प्राज्ञं कुलीनं शूरञ्च दक्षं दातारमेव च ।
कृतज्ञं धृतिमन्तञ्च कष्टमाहुररिं बुधाः” ॥)
कुक्कुरे, पुं । इति मेदिनी ॥
(पुं,विष्णुः । यथा, महाभारते १३ । १४९ । २२ ।
“अनुत्तमो दुराधर्षः कृतज्ञः कृतिरात्मवान्” ॥)

कृतत्रा, स्त्री, (कृतं त्रायते । कृत + त्रै + कः ।) त्रायमाणा लता । इति राजनिर्घण्टः ॥

कृतदासः, पुं, (कृतः विहितः कृतनियमो वा दासः ।) नारदोक्तपञ्चदशदासान्तर्गतदासविशेषः । स तु केनचिन्निमित्तेन एतावत्कालपर्य्यन्तं तवाहं दास इति कृतसमयः । इति क्रमसंग्रहः ॥

कृतपुङ्खः, त्रि, (कृतः अभ्यस्तः पुङ्खः पुङ्खयुक्तो बाणो येन ।) बाणशिक्षाविचक्षणः । भाल तिरान्दाज इति भाषा । तत्पर्य्यायः । कृतहस्तः २ सुप्रयोगविशिखः ३ । इत्यमरः । २ । ८ । ६८ ॥

कृतपूर्व्वी, [न्] त्रि, (कृतं निष्पादितं पूर्व्वमनेन । कृतपूर्व्व + “सपूर्व्वाच्च” । ५ । २ । ८७ । इति इनिः ।) पूर्व्वनिष्पन्नकर्म्मा । यथा । कृतपूर्व्वी कटम् । इति संक्षिप्तसारव्याकरणम् ॥

कृतफलं, क्ली, (कृतं फलं अस्य ।) कक्कोलम् । इति राजनिर्घण्टः ॥

कृतफला, स्त्री, (कृतं फलं अस्याः ।) कोलशिम्बी इति राजनिर्घण्टः ॥

कृतमालः, पुं, (कृता माला अस्य । मालावदुत्पन्नप्रसूनत्वादस्य तथात्वम् ।) आरग्वधवृक्षः । सोंदालि इति भाषा । इत्यमरः । २ । ४ । २४ ॥ कर्णिकारवृक्षः । स तु क्षुद्रारग्वधः । इति राजनिर्घण्टः । छोट शोनालु इति भाषा ॥ (अस्य पर्य्याया यथा ।
“आरेवतो राजवृक्षः प्रग्रहश्च तुरङ्गकः ।
आरग्वधोऽथ शम्याकः कृतमालः सुवर्णकः” ॥
इति वैद्यकरत्नमालायाम् ॥
चरके कल्पस्थाने ऽष्टमेऽध्याये ऽस्य पर्य्याया यथा ।
“आरग्वधो राजवृक्षः सम्याकश्च तुरङ्गकः ।
प्रग्रहः कृतमालश्च कर्णिकारोऽवघातकः” ॥)

कृतमुखः, त्रि, (कृपं संस्कृतं मुखं यस्य ।) कृतकर्म्मा । कृती । इत्यमरः । ३।१ । ४ ॥

कृतलक्षणः, त्रि, (कृतानि लक्षणानि अस्य ।) गुणैः प्रतीतः । शौर्य्यादिगुणैः ख्यातः । इत्यमरः । ३ । १ । १० ॥ (पुं, सर्व्वलक्षणवत्त्वात् विष्णुः । यथा, महाभारते । १३ । १४९ । ६४ ।
“अविज्ञाता सहस्रांशुर्विधाता कृतलक्षणः” ॥)

कृतवेतनः, त्रि, (कृतं विहितं वेतनं यस्य ।) वेतनेन नियुक्तदासादिः । इति स्मृतिः ॥

कृतवेधकः, पुं, (कृतः वेधोऽस्य । ततः कप् ।) घोषातकी । इति रत्नमाला । श्वेतघोषा इति भाषा ॥

कृतवेधना, स्त्री, (कृतं वेधनं अस्याः ।) कोशातकी लता । इति राजनिर्घण्टः ॥

कृतश्रमः, त्रि, (कृतः श्रमो यत्र ।) महोत्साहः । येन श्रमः कृतः सः । इति शब्दमाला ॥

कृतसापत्निका, स्त्री, (कृतं सापत्न्यं यस्याः । कप् टाप ततः अत इत्वे य लोपः ।) कृतसपत्नीभावा । प्रथमविवाहिता स्त्री । तत्पर्य्यायः । अध्यूढा २ अधिविन्ना ३ । इत्यमरः । २ । ६ । ७ ॥ कृतसापत्नका ४ कृतसापत्नी ५ कृतसापत्नीका ६ । इति तट्टीकायां रमानाथः ॥

कृतहस्तः, त्रि, (कृतः अभ्यस्तः हस्तः बाणादिनिक्षेपलाघवरूपा शिक्षा येन सः ।) कृतपुङ्खः । सुशिक्षितशरमोक्षणयोधादिः । इत्यमरः २ । ८ । ६८ ॥ (यथा, महाभारते । ४ । ५६ । २० ।
“अप्राप्तांश्चैव तान्पार्थश्चिच्छेद कृतहस्तवत्” ॥)

कृताञ्जलिः, त्रि, कृतः अञ्जलिः येन सः । बद्धाञ्जलिः । यथा, छन्दोगपरिशिष्टे ।
“तदसंयुक्तपार्ष्णिर्व्वा एकपादर्द्धपादपि ।
कुर्य्यात्कृताञ्जलिर्व्वापि ऊर्द्धबाहुरथापि वा” ॥
इति सूर्य्योपस्थाने आह्निकाचारतत्त्वम् ॥ (कृतः अञ्जलिरिव पत्रसङ्कोचो येन ।) ओषधिभेदे, पुं । इति धरणी ॥

कृतान्तः, पुं, (कृतः अन्तः नाशः, शास्त्रनिर्णयः, विपर्य्ययो वा येन । यथायथं व्युत्पत्तिर्दर्शनीया ।) यमः । (यथा, रामायणे । ५ । ३५ । ३ ।
“ऐश्वर्य्ये वा सुविस्तीर्णे व्यसने वा सुदारुणे ।
रज्ज्वेव पुरुषो बद्धा कृतान्तेनोपनीयते” ॥)
सिद्धान्तः । (यथा, भगवद्गीतायाम् । १४ । १३ ।
“पञ्चेमानि महाबाहो कारणानि निबोध मे ।
सांख्ये कृतान्ते प्रोक्तानि सिद्धये सर्व्वकर्म्मणाम्” ॥)
दैवम् । पूर्व्वदेहकृतं फलोन्मुखीभूतं शुभाशुभकर्म्म । अकुशलकर्म्म । इत्यमरः । ३ । ३ । ६४ ॥ शनिवारः । इति शब्दचन्द्रिका ॥ (यथा, तिथितत्त्वधृतज्योतिषवचने ।
“कृतान्तकुजयोर्वारे यस्य जन्मदिनं भवेत्” ।
यमदैवत्यभरणीनक्षत्रम् । तेन त्रित्वसङ्ख्या ॥ अग्नियमदहनेति वचनात् ॥)

कृतान्तजनकः, पुं, (कृतान्तस्य यमस्य जनकः जन्मदाता ।) सूर्य्यः । इति हेमचन्द्रः ॥

कृतान्ता, स्त्री, (कृतान्त + टाप् ।) रेणुकानामगन्धद्रव्यम् । इति शब्दचन्द्रिका ॥

कृतार्थः, त्रि, (कृतः निष्पादितः प्राप्तो वा अर्थः प्रयोजनं येन ।) कृतप्रयोजनः । कृतकार्य्यः । यथा, माघे । १ । ९ । “विलोकनेनैव तवामुना मुने कृतः कृतार्थोऽस्मि निवर्हितांहसा” ॥

कृतालयः,पुं, (कृते अन्यकृतगर्त्ते जलाशयादौ आलयः आश्रयो यस्य ।) भेकः । इति त्रिकाण्डशेषः ॥ (कृतः आलयः येन । कृतवासे, त्रि । यथा, रामायणे ।
“यत्र ते दयिता भार्य्या तनयाश्च कृतालयाः” ॥)

कृतावश्यकः, त्रि, (कृता आवश्यक्रिया येन ।) वस्त्रादिना कृतपृष्ठजानुजङ्घादिबन्धः । इति कात्यायनः ॥ (यथा, आह्निकतत्त्वधृतकात्यायनवचने ।
“प्रौढपादो न कुर्व्वीत स्वाध्यायपितृतर्पणम् ।
आसनारूढपादस्तु जानुनोर्जङ्घयोस्तथा ।